श्रीधर्मशास्तुः अष्टोत्तरशतनामस्तोत्रम्

{॥ श्रीधर्मशास्तुः अष्टोत्तरशतनामस्तोत्रम् ॥}

श्री पूर्णापुष्कलाम्बासमेत श्री हरिहरपुत्रस्वामिने नमः ॥

ध्यानम् ॥

कल्हारोज्वल नीलकुन्तलभरं कालांबुद श्यामलं
कर्पूराकलिताभिराम वपुषं कान्तेन्दुबिम्बाननं ।
श्री दण्डाङ्कुश-पाश-शूल विलसत्पाणिं मदान्त-
द्विपारूढं शत्रुविमर्दनं हृदि महा शास्तारं आद्यं भजे ॥

महाशास्ता महादेवो महादेवसुतोऽव्ययः ।
लोककर्ता लोकभर्ता लोकहर्तापरात्परः ॥ १

त्रिलोकरक्षको धन्वी तपस्वी भूतसैनिकः ।
मन्त्रवेदी महावेदी मारुतो जगदीश्वरः ॥ २

लोकाध्यक्षोऽग्रणीः श्रीमानप्रमेयपराक्रमः ।
सिम्हारूढो गजारूढो हयारूढो महेश्वरः ॥ ३

नानाशस्त्रधरोऽनर्घो नानाविद्याविशारदः ।

नानारूपधरो वीरो नानाप्राणिनिषेवितः ॥ ४

भूतेशो भूतितो भृत्यो भुजङ्गाभरणोज्वलः ।

इक्षुधन्वी पुष्पबाणो महारूपो महाप्रभुः ॥ ५

मायादेवीसुतो मान्यो महनीयो महागुणः ।

महाशैवो महारुद्रो वैष्णवो विष्णुपूजकः ॥ ६

विघ्नेशो वीरभद्रेशो भैरवो षण्मुखप्रियः ।

मेरुश‍ृङ्गसमासीनो मुनिसंघनिषेवितः ॥ ७

वेदो भद्रो जगन्नाथो गणनाथो गणेश्वरः ।

महायोगी महामायी महाज्ञानी महास्थिरः ॥ ८

वेदशास्ता भूतशास्ता भीमहासपराक्रमः ।

नागहारो नागकेशो व्योमकेशः सनातनः ॥ ९

सगुणो निर्गुणो नित्यो नित्यतृप्तो निराश्रयः ।

लोकाश्रयो गणाधीशश्चतुषष्टिकलामयः ॥ १०

ऋग्यजुःसामथर्वात्मा मल्लकासुरभञ्जनः ।

त्रिमूर्ति दैत्यमथनः प्रकृतिः पुरुषोत्तमः ॥ ११

कालज्ञानी महाज्ञानी कामदः कमलेक्षणः ।

कल्पवृक्षो महावृक्षो विद्यावृक्षो विभूतिदः ॥ १२

संसारतापविच्छेत्ता पशुलोकभयङ्करः ।

रोगहन्ता प्राणदाता परगर्वविभञ्जनः ॥ १३

सर्वशास्त्रार्थ तत्वज्ञो नीतिमान् पापभञ्जनः ।

पुष्कलापूर्णासंयुक्तः परमात्मा सतांगतिः ॥ १४

अनन्तादित्यसङ्काशः सुब्रह्मण्यानुजो बली ।

भक्तानुकंपी देवेशो भगवान् भक्तवत्सलः ॥

इति श्री धर्मशास्तुः अष्टोत्तरशतनामस्तोत्रं सम्पूर्णं ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

% File name : dharmashaastaa108stotra.itx
% Category : aShTottarashatanAma
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : Hinduism/religion/traditional
% Transliterated by : Antaratma antaratma at Safe-mail.net
% Proofread by : Antaratma antaratma at Safe-mail.net
% Latest update : April 17, 2006
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website